# 2017

## SANSKRIT

## [ Honours ]

## PAPER – VI

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

[ NEW SYLLABUS ]

### GROUP—A

1. कस्यचन एकस्य प्रश्नस्योत्तरं प्रदेयम्— 10 × 1

(क) किं कारकम् ? तत् कतिविधम् ? तेषां नामानि उल्लिख्य अधिकरणकारकं विस्तरश आलोच्यताम् ।

( Turn Over )

(ख) किं नाम कर्मप्रवचनीयम् ? व्याकरणनिकाये कथं तस्य उपयोगः ससूत्रमालोच्यताम् ।

2. निम्नोक्तेषु एकं सूत्रं संस्कृतभाषया देवनागरलिप्या च व्याख्येयम् — 4 × 1

(क) स्वतन्त्रः कर्ता ।

(ख) अपवर्गे तृतीया ।

(ग) रुच्यर्थानां प्रीयमाणः ।

3. भट्टोजिदीक्षितवचनम् एकं विव्रियताम्— 6 × 1

(क) 'कर्म' इत्यनुवृत्तौ' पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम् ।

(ख) परापि तृतीया अनेन बाध्यते ।

(ग) कृति किम् ? तद्धिते मा भूत् ।

4. कस्यचन एकस्य संस्कृतभाषया देवनागरलिप्या च टीका लेख्या— 4 × 1

विभाषा, आम्रेडितम्, उपपदविभक्तिः ।

5. संस्कृतभाषया देवनागरलिप्या च ससूत्रमधस्तनेषु त्रयाणां सकारण-विभक्तिः निरूपणीया— 2 × 3

(क) अक्षान् दीव्यति ।

(ख) अलं श्रमेण ।

(ग) नमस्कुर्मः नृसिंहाय ।

(घ) वने उपवसति ।

(ङ) विद्वान् सर्वत्र पूज्यते ।

(च) गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ।

## GROUP—B

6. कस्यचित् एकस्य प्रश्नस्योत्तरं लेख्यम्— 10 × 1

(क) वृत्तिः का ? सा कतिविधा ? ताः व्याख्येयाः ।

(ख) को नाम द्वन्द्वसमासः ? कतिविधः सः ? कस्तत्र पूर्वनिपातनियमः ? एतत्सर्वं वैशद्येन व्याख्यायताम् ।

7. अधस्तनेषु कस्यचन एकस्य सूत्रस्य संस्कृतभाषया देवनागरलिप्या च व्याख्या लेख्या — 4 × 1

(क) समर्थः पदविधिः ।

(ख) कर्तृकरणे कृता बहुलम् ।

(ग) अनेकमन्यपदार्थे ।

8. कस्यचन एकस्य दीक्षितवचनस्य व्याख्या कार्या — 6 × 1

(क) अनित्योऽयं गुणेन निषेधः, तदशिष्यं संज्ञाप्रमाणत्वात् ।

(ख) विभाषाधिकारेऽपि वाक्येन संज्ञानवगमादिह नित्यसमासः ।

9. कस्यचन एकस्य संस्कृतभाषया देवनागरलिप्या च टीका लेख्या — 4 × 1

नञ्-तत्पुरुषः, भाषितपुंस्कम् , कर्मधारयः ।

10. अधस्तनेषु द्वयोः पदयोः ससूत्रं संस्कृतभाषया देवनागरलिप्या च साधनप्रक्रिया प्रदेया — 3 × 2

किंराजा , अध्यात्मम् , पूर्वकायः, पञ्चवटी ।

## GROUP—C

11. अधस्तनेषु द्वयोः प्रश्नयोः उत्तरं प्रदेयम्— 10 × 2

(क) कस्तावत् ध्वनिनियमः ? ग्रीममहोदयस्य ध्वनिनियमः येन प्रकारेण भेर्नार्महोदयेन संस्कृतः तथा सोदाहरणं व्याख्येयः ।

(ख) वैदिकसंस्कृतभाषयोः भाषातत्त्वगतं वैशिष्ट्यमालोच्यताम् ।

(ग) इन्दो–इराणीयभाषावर्गस्य भाषाविज्ञानसम्मतानि वैशिष्ट्यानि आलोच्यानि ।

(घ) 'भाषापरिवार' इत्यनेन किं ज्ञायते ? 'भारोपीयभाषापरिवार' इति विषयमधिकृत्य निबन्ध एको विरचनीयः ।

12. अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः— 1 × 5

(क) 'आवेस्ता' कस्य वर्गस्य भाषा ?

(ख) का नाम अपिनिहितिः ?

(ग) कस्य मते घोषमहाप्राणध्वनयः घोषाल्पप्राणा अभूवन् ?

(घ) समीभवनमित्यनेन किं बोध्यते ?

(ङ) कदा वर्णविपर्ययो भवति ?

(च) ग्रीग्भाषा कं भाषावर्गमन्तर्याति ?

(छ) को नाम समाक्षरलोपः ?

(ज) भारतीयार्यभाषायाः कति भेदाः सन्ति ?

**13.** उच्चारणज्ञापकचिह्नैः सह अधस्तनश्लोकयोः एकः रोमान्लिप्या लेख्यः — 5 × 1

(क) गङ्गा पापं शशी तापं दैन्यं कल्पतरुर्हरेत् ।
पापं तापञ्च दैन्यञ्च हरेत् साधुसमागमः ॥

(ख) स जीवति यशो यस्य कीर्तिर्यस्य स जीवति ।
अयशोऽकीर्तिसंयुक्तो जीवन्नपि मृतोपमः ॥

---